P

2860

Pam 619

T 134

4

ಕೋತ್ಸವ, ಕೂಡ್ಲಿ ರಥ

ಹಾಗೂರು ಶಾಲೆಯಿಂದ ಬಳಸಲು

649
T134

ಪುಸ್ತಕ ಸಂಖ್ಯೆ..... 0-2860

ई ह का व्य शा च्या यि वी. स्वामि प्रा धानि व ह्न म
प्र तु त्त रे ण दा त व्य. मि त्य ह ं भ व ... - र्थ यें
आदिभट्ट नारायणदासः
विजयनगरम

तारकम् ।

134

ब्रह्मश्रीमदज्जाडादिभट्ट

नारायणदासविरचितम् ।

चित्तिकटिदुर्गाधीश्वरप्रोत्साहेन

मुम्बय्यां

निर्णयसागराख्यमुद्रणयन्त्रालये बालकृष्ण रामचंद्र घाणेकरेण

मुद्रितम् ।

शके १८३२

सन १९१०


Printed at the Nirnayasagar Press, Kolbhat Lane, No. 23 Bombay by B. R. Ghanekar.

Published by A. Narayandas,
Vijayanagaram.

Price 6 Annas.



प्रतिज्ञा.



अस्मिन्ग्रन्थे श्लोकेषु पादपूरणमात्रफलकपदमुपसर्गस्य वोपसर्गसमाना कारस्य पुनरुक्तिरप्रसिद्धोपसर्ग उताप्रसिद्धोपसर्गसमानाकारो भिन्नलिङ्गवचन सादृश्यं लोकातीतपदार्थवाचकशब्दो विना दिवूधातुघटितं नास्ति लुङ् लङ्लिटोऽधिक्रियन्ते क्रमशः प्रथमद्वितीयतृतीयसर्गेषु द्वितीयतृतीयसर्गयो र्भूतेतरक्रियावाचकतिङन्तरूपं न विद्यते पाणिनीयसूत्राणामवैदिकाना मुदाहरणमेतत्काव्यम्.



तारके प्रथमः सर्गः ।

भूतेलुङधिकारः ।

उपजातिः ।

सा देवभाषाऽखिललोकमान्या
प्रसाधयाम्यद्य तयामदूहाम् ।
हर्षाय लोकस्य परिष्करोति
तनुं जनोऽनुत्तमभूषयैव ॥ १ ॥
स्वभावपाण्डित्यबलेन कुर्वे
काव्यं पतत्री सहसेव नीडम् ।
सदोषमप्युत्तपते कवित्वं
यथा कलङ्काऽङ्कितमिन्दुबिम्बम् ॥ २ ॥
स देवताऽधीनमनःप्रवृत्तिः
स्वातन्त्र्यसङ्कल्पितचारुकाव्यः ।
दयाऽऽर्द्रचित्तोऽश्चितसत्यवाक्यः
कलाचणः सत्कविरेव नाऽन्यः ॥ ३ ॥
विन्ध्यप्रदेशे क्वचिदस्ति चञ्च-
न्नदीतटे संश्रितकल्पनामा ।
ग्रामः पुरा तत्र महेश्वराऽऽख्य-
स्तपोधनो ब्राह्मणराडवात्सीत् ॥ ४ ॥
यथाऽर्थवाक्सन्नुतदिव्यतेजा
नक्तंदिवं पूजितदेवदेवः ।
पौराणिकः पूतयशा वदान्यः
स देवभाषानिपुणः कवीन्द्रः ॥ ५ ॥
मुदा यथाशक्त्यतिथीनतर्पी-
त्सदाऽऽत्मशिष्यानशिषत्स्वधर्मम् ।

न्यवीवृतद्रागपथाद्विमूढा-
न्स पण्डितः साधुजनानभाक्षीत् ॥ ६ ॥
बाल्यं गुरोरध्ययनेन तस्य
स्वभार्यया यौवनमिद्धकीर्तेः ।
अनायि सद्ब्राह्मणशेखरस्य
वृद्धत्वमन्तं तपसा समस्तम् ॥ ७ ॥
तं तस्य पत्नी सुदती प्रशान्ता
महाकुलीना कमनीयनेत्रा ।
संपूर्णजैवातृकबिम्बवक्त्रा
शतह्रदा मेघमिवाऽन्वसार्षीत् ॥ ८ ॥
भर्त्रा यथा सा कथितं पुराणं
श्रुत्वाऽशकन्मञ्जु तथैव वक्तुम् ।
प्रशस्तबुद्धिस्तपनीयगात्रा
प्रियंवदा सज्जनकीर्तनीया ॥ ९ ॥
तौ दम्पती निर्मलशीलयुक्तौ
प्रवृद्धसन्तानयशोविशालौ ।
सुखेषु दुःखेषु समानचित्ता-
वभ्राजि ताभ्यां धरणी चिराय ॥ १० ॥
पुण्याऽऽत्मनोः सद्गृहिणोस्तयोरु-
दभूत्कनिष्ठः परदेवतांऽशः ।
पुत्रेषु तं बालकवेषयुक्तं-
मुदा दिवौकोनिवहोऽववर्णत् ॥ ११ ॥
प्रभो महादेव दयामयेश
त्वं लीलयेत्थं जगतीं तनित्वा ।
श्रुत्या भणित्वाऽखिलभूतकर्म
स्वमायया क्रीडसि निर्गुणोऽपि ॥ १२ ॥

भेदो यथा काण्डतरङ्गयोर्न
स्यात्तेऽस्य लोकस्य तथैव देव ।
सर्वः प्रपञ्चस्त्वयि कल्पितो वा
स्थाणौ भवेदस्युरिव भ्रमेण ॥ १३ ॥
धरामनुष्यैः परमार्थदूरैः
क्रौर्यान्वितैस्तुच्छसुखाभिलाषैः ।
निपीडिता सम्प्रति नास्तिकैरि-
त्यजोऽपि तां त्रातुमिहाऽजनिष्ठाः ॥ १४ ॥
दृश्याऽप्यदृश्या सदसत्स्वरूपा
त्वदीयमाया भ्रमकारणं सा ।
दिगन्तरेखावदतीन्द्रियं ते
तत्त्वं जगन्नाटकसूत्रधार ॥ १५ ॥
त्वया विना किं सुखमस्ति तत्र
मन्यामहे शून्यमिवाऽखिलं तत् ।
सर्वं दिवं तावकपादचिह्नै-
र्धन्या भवत्यद्य धराऽप्रमेय ॥ १६ ॥
भक्त्यैव तेऽधीश्वर देवताऽपि
शक्नोति वेत्तुं परमार्थतत्वम् ।
दृष्टिस्स्वरूपं मुकुरश्रियैव
विलोकितुं शक्यत आदिदेव ॥ १७ ॥
कान्भाग्ययुक्तानिह तावकीन-
मित्रत्वमाप्तुं तव गूढचर्याम् ।
ज्ञातुं त्वया रन्तुमनन्तभूमा-
वजीजनो नो वद देवदेव ॥ १८ ॥
त्वदीक्षणेनाऽऽत्मनि विश्ववारो
देदीप्यतेऽधीश्वर लीयते सः ।

नूनं तथाऽनूनकवस्तुसङ्घः
स्वप्ने यथा विभ्रमणेन देव ॥ १९ ॥
एकत्वसङ्ख्याप्रतिपादकाङ्को
निरन्तरं बोधयते बहुत्वम् ।
बिन्द्वन्वितः सुष्ठु यथा स्वभाव-
युतस्त्वमेकोऽपि तथाऽसि देव ॥ २० ॥
इत्थं स्तुवन्तं प्रमदाऽश्रुमन्तं
देवोऽगदीद्दिव्यगणं दयालुः ।
श्रिताऽनुकूलः कमनीयवाक्यं
भक्ताऽभयं सत्यमतीव गोप्यम् ॥ २१ ॥
नन्दामि हे देवसभ त्वदीय-
वाक्यैर्यथाऽर्थं प्रतिपादयद्भिः ।
वेदान्तगोप्यैरनुकम्पया त्वा-
मेतर्ह्यहं वच्म्यवतारहेतुम् ॥ २२ ॥
अस्मिन्कलौ सत्यदयाऽतिरिक्ताः
श्रद्धाविहीना मनुजा भवन्ति ।
निद्राऽशनस्त्रीरतिमात्रलोला
नक्तंदिवं नश्वरसम्पदन्धाः ॥ २३ ॥
तस्मादहं तान्बहुमूढचित्ता-
न्ससंारघोराऽर्णवतो मनुष्यान् ।
उद्धारयिष्याम्युचितक्रमेण
विमोहयन्नद्भुतवर्तनेन ॥ २४ ॥
आनन्दयिष्यामि मदीयभक्ता-
नद्वैततत्वं मम दर्शयिष्ये ।
अहं सदा तान्कृपया नटिष्या-
म्यनन्तवेषैः सुजनैकवेद्यैः ॥ २५ ॥

विस्मृत्य तत्वं मम नित्यसत्य-
मश्रान्तमानन्दमयं यथेष्टम् ।
वशो भविष्याम्यखिलार्थबन्ध-
सन्धानमूलप्रकृतेः कदाचित् ॥ २६ ॥
भक्ताय मूढाय विचक्षणायो-
न्मत्ताय धीराय सकैतवाय ।
तत्तद्रसान्दर्पणवद्यथेच्छं
निवेदयिष्येऽहमकामनोऽपि ॥ २७ ॥
नत्वा महादेवमिति ब्रुवन्तं
दिव्यव्रजोऽगान्निलयं स्वकीयम् ।
सद्योऽभिजातं तनयं विलोक्याऽ-
मोदिष्ट माताऽऽत्मकुलप्रदीपम् ॥ २८ ॥
प्रवर्ध्यते येन चराचरं तं
लीलामनुष्यं नितराऽऽत्मतृप्तम् ।
मोहादुपाऽङ्कस्त तदीयमाता
स्तन्येन सम्पोषितुमादिदेवम् ॥ २९ ॥
मायानिबद्धं मनुजाऽऽयुरेवं
नानाप्रकारैर्विरमेच्छुचस्तत् ।
यदा स्वमातुर्जठरादपप्त-
त्तदेत्यशोकोऽप्यरुदन्महात्मा ॥ ३० ॥
उन्मीलनं तस्य निमीलनं स्या-
दोष्ठस्य सर्वाऽऽयुषि शर्म कष्टम् ।
ते इत्थाऽब्रूबुधतां कचाऽऽलिः
कालस्य वक्रां गतिमालुलोकत् ॥ ३१ ॥
यो रक्षकोऽभूद्भुवनस्य जोष-
मसद्ग्रहः स्प्रष्टुमशक्त नोयम् ।

प्रसूर्विभोस्तस्य गलेऽपि रक्षा-
बन्धं न्यभान्त्सीन्मणिमन्त्रपूतम् ॥ ३२ ॥
अजस्रमौष्ण्यं तनुते दिनेशः
समस्तसृष्टिस्थितिनाशहेतोः ।
यस्य प्रभावेन विभोः सुखं सोऽ-
स्वाप्सीद्धसन्त्यन्तिकमादिदेवः ॥ ३३ ॥
मुदन्वितः सन्ततसाक्षितत्व-
मद्वैतमात्मीयमथाऽतनिष्ट ।
स्तनन्धयो मञ्जुलनिर्विकार-
दृष्ट्या स आन्दोलनरम्यमञ्चे ॥ ३४ ॥
निजाऽऽत्मनो यस्य कदाऽपि नाऽन्य-
दृष्टिर्व्यराजीत्स सरोजमालाम् ।
ऐक्षिष्ट तत्रोपरिभागबद्धां
शिशुः परिव्राडिव योगमुद्राम् ॥ ३५ ॥
व्योमैकलक्ष्यां स्वदृशं निवर्त्य
भूमीं स कृत्यैर्बहुदुर्जनानाम् ।
खिन्नामलोकिष्ट दयाऽऽर्द्रचित्तो
मा देवि भैषीरिति दीनबन्धुः ॥ ३६ ॥
गत्वा स पीठं कुलदेवताया
विस्मित्य पूजाप्रतिमां गृहीत्वा ।
अपीपतद्दूरमपि स्वभावो
देवेषु मात्सर्यमितीव देवः ॥ ३७ ॥
मुहुर्यथेच्छं कृतमन्दहासै-
रकामतः कल्पितमुग्धकृत्यैः ।
अव्यक्तवादैर्निजशैशवं सोऽ-
बभ्राजदेवं स्वमिवाऽऽद्ययोगी ॥ ३८ ॥

आह्वायिता तेन स जीवकेति
यदास्फुरद् ज्ञानविवृत्तकण्ठः ।
तदाऽगमद्राक्षितुरङ्कदेशं
स्मित्वा प्रभुर्भक्तजनाऽनुकूलः ॥ ३९ ॥

प्रशस्तयोगाऽन्वितजातकस्य
बालस्य लोकोत्तरलक्षणस्य ।
मौहूर्तिकास्तस्य मुदा यथाऽर्थ-
मदीधरंस्तारकनामधेयम् ॥ ४० ॥

अवाप्तकामं सतताऽऽत्मतृप्त-
मन्नस्वरूपं विभुमप्रबुध्य ।
माता सुतं जानुचरं दिवेशं
तमाशिशत्पायसमुत्सवेन ॥ ४१ ॥

एकं पिबन्मातृपयोधरं स
विमर्दयन्कोमलपाणिनाऽन्यम् ।
निमीलिताऽक्षः सुखपारवश्या-
ददिद्युतन्निर्गुणमात्मतत्वम् ॥ ४२ ॥

हिताऽहितं सोऽविगणय्य नित्यं
साक्षिस्थितिं प्राप्य महानुभावः ।
आकाशवत्कल्पितरूप उर्वी-
देवाऽऽत्मजोऽभूद्भुवनैकवन्द्यः ॥ ४३ ॥

मुखे पदाऽङ्गुष्ठमसौ निधाय
स्वभावरम्याऽमलदीर्घदृष्टिः ।
विस्मृत्य तीक्ष्णक्षुधमर्दितोऽप्य-
क्रीडीन्महानन्दपयोधिमग्नः ॥ ४४ ॥

तदुन्नसं सुन्दरमन्दहासं
प्रसन्नमत्यन्तविशालनेत्रम् ।

चारुस्फुटाऽम्भोजसदृक्षवक्त्रं
सदाऽन्वबोभूयि सगोत्रदृग्भिः ॥ ४५ ॥
त्रातारमेवार्दयति प्रकृत्या
कृतोपकारं न विचार्य मूढः ।
सन्दष्टमात्रश्चितचूचुकेनाऽ-
बोबुध्यभीक्ष्णं शिशुनेति लोकः ॥ ४६ ॥
यो वेदनिश्वासयुतः समस्तं
जानाति योयं न हि वेत्ति लोकः ।
अम्बापदं शक्यत एष वक्तुं
मातेति मग्ना प्रमदार्णवेऽभूत् ॥ ४७ ॥
अम्बाऽन्यशब्दो नहि वाक्प्रपञ्चे
पुनः पुनः पञ्चजनेन भाण्यः ।
अम्बेत्युदित्वा महिमानमस्य
जनांस्तदाऽवीविददर्भकोऽसौ ॥ ४८ ॥
वक्राऽलकाऽलङ्कृतफालभागं
बन्धून्विदित्वा कृतमन्दहासम् ।
यसन्तमुत्थातुममुं विलोक्य
मोदार्णवे सा जननी न्यमाङ्क्षीत् ॥ ४९ ॥
प्रत्यग्रसान्द्राऽऽनतकैशिकेन
तमो रजस्स्वोष्ठतलेन सत्त्वम् ।
स्मितेन बालोऽनिशनिर्गुणोऽप्य-
धाल्लीलया लोकविडम्बनाय ॥ ५० ॥
स्यात्स्वापनिघ्नः सकलश्वराणां-
प्रायो बुभुक्षापरतन्त्रजीवः ।
असोषुपिष्टेत्युरसि स्वमातु-
रसावतन्द्रोऽपि पयांसि पीत्वा ॥ ५१ ॥

आयाहि पुत्रेति यदा स्वपित्रा
हूतस्तदासौ करतालकर्त्रा ।
अजङ्गमिष्टास्थिरनूपुराङ्घ्रि-
द्वयस्मितास्यः पितुरङ्कदेशम् ॥ ५२ ॥
इतस्ततः सुन्दरलोलदृष्टि-
रव्यक्तमुग्धामृतकण्ठनादः ।
जम्बालसंलग्नमनोहराङ्गो
द्विहायनी वालमदादधिष्ट ॥ ५३ ॥
भूत्वा यथेच्छं प्रकृतेरधीनो
नानाविधा ऐहिकमूढचेष्टाः ।
सन्तत्य दिव्यस्थितिमात्मनः सोऽ-
हासीद्विलासाय सदाचलोऽपि ॥ ५४ ॥
कुमारकः सम्यचिचत्स्वरूपं
दृशौ प्रगल्भोऽतितिरायदस्य ।
सदाससध्रायदसौ सगर्भ्या-
नशिश्रयत्स्वीयकुलं महिम्ना ॥ ५५ ॥
नखाग्रवज्रैरलकेन्द्रनीलै-
रोष्ठप्रवालेन सदन्ततारैः ।
पत्पञ्चशाखाननेत्रपद्मा-
ल्येवाचकासीन्मणिपुष्पराशिः ॥ ५६ ॥
उरूदकुम्भं सहसादृणन्तं
नैवेद्यमन्नं झटिति ग्रसन्तम् ।
तमर्चितं विग्रहमुत्क्षिपन्त-
मक्षंस्त माता तनयं समीक्ष्य ॥ ५७ ॥
अमम्रदत्स्वीयमनस्सुमाद-
प्यपप्रथत्सत्वगुणं पयोधेः ।

अचक्रशन्नैजतमस्सशून्या-
ददद्रढद्धैर्यमगग्रकाण्डात् ॥ ५८ ॥

मालिनी ।

नवरसरुचिवेदी सर्वभूतानुवादी
ललितचरणचारी साध्वलङ्कारधारी ।
परवशसुखयोगश्चित्रसङ्कल्पभोगः
कविरिव स कुमारः प्रस्तुतोऽभूदुदारः ॥ ५९ ॥

तारके द्वितीयः सर्गः ।

लङधिकारः ।

मालिनी ।

तदुपनयनकर्माऽथाकरोत्तस्य तातः
सकलनिगमधर्मस्थापनायानवद्यम् ।
परवशमुरुकष्टं देव आयुर्नराणां
स पृथुक इति भिक्षापात्रमीशोऽप्यधत्त ॥ १ ॥
करयुगल उदग्रं पर्णदण्डं वलग्ने
स्फुरदभिनवमौञ्जीबन्धनं ब्रह्मसूत्रम् ।
हृदि शिरसि शिखानां पञ्चकं दर्शनीयं
वटुरभरत कट्यां पीतकौपीनमेषः ॥ २ ॥
निजगुरुपदभक्तं सर्वविद्यानुरक्तं
सकलसुजनमित्रं मञ्जुलश्वेतगात्रम् ।
अतुलितकुलदीपं वीक्ष्य विद्वत्कलापं
मुदमवहदमन्दं प्रत्यहं बन्धुवृन्दम् ॥ ३ ॥
अपि परमरहस्यं ज्ञानवित्तं गुरुभ्योऽ-
द्भुतकरबहुमेधोनैपुणेनोपलभ्य ।
मृदुलमधुररीत्यातोषयत्पण्डितौघं
विनयमलभतासौ स्वीयविद्यानुकूलम् ॥ ४ ॥
अतुललितरूपः सर्ववेदः प्रशान्तः
सकलजनसमानः सर्वतन्त्रःस्वतन्त्रः ।
विजितसमवयस्को विद्यया सद्यशस्कोऽ-
भ्यलषत परदेशालोकनं तत्कुमारः ॥ ५ ॥

सहजवशमुपेतो लीलया गूढतेजा
अशनवसनसक्तो बाल्यचापल्ययुक्तः ।
तत इत इव देवो बालकोऽजोऽपि गच्छ-
न्विबुधनगरनाम प्राविशत्पत्तनं सः ॥ ६ ॥
मधुरवनपरीता स्वादुपानीयपूता
सकलधनसमृद्धा गन्धवातप्रसिद्धा ।
पृथुलभवनरम्या साधुवृन्दानुगम्या
व्यलसदुरुमदेभा सा पुरी दिव्यशोभा ॥ ७ ॥
ललितकुलसतीभिः साधुशीलान्विताभि-
श्चतुरपुरुषवर्यैः साधितामोघकार्यैः ।
अमलपृथुनिवासैः सर्वसम्पद्विलासै-
र्नगरवरमराजत्कुम्भिनीभूषणं तत् ॥ ८ ॥
प्रतिहतकुवदानां गन्ध आत्मम्भरीणां
खलचपलमुसल्यक्रूरकर्णेजपानाम् ।
जडशठकृपणानामेडमूकाक्षराणां
सकृदपि नहि तत्रासीन्निरस्तास्थिराणाम् ॥ ९ ॥
सततशमितभावः प्राभवद्भूमिदेवः
पृथुमहदनुरक्तः साधुमूर्धाभिषिक्तः ।
सकलविभवदृश्यः पत्तनेवाचि वैश्यः
परहितगुणभद्रः सर्वथा तत्र शूद्रः ॥ १० ॥
अनुपदमपि वर्णी कथ्यमानं स वृद्धै-
श्चरितमिति पुराणं यन्नगर्याः प्रबुध्य ।
चतुरमतिरपश्यन्मानवानां वितानं
सकलकलुषनिघ्नं तत्पुरे कण्ठदघ्नम् ॥ ११ ॥
परपरिहृतवित्तं सायथातथ्यवृत्तं
भुवनविदितशिष्टाचारदूरं समन्तात् ।

वपुरिव गतजीवं पत्तनं जीर्णपुण्यं
निपुणतरमतिः सोऽतर्कयद्विप्र इत्थम् ॥ १२ ॥
अनयदिह कुमार्गं धर्मशून्याधिकारी
सकलजनसमूहं वृत्ततः क्षिप्तमद्य ।
अहमखिलनगर्यामाविलायामपश्यं
निखिलमनिलमम्भो रोगमूलं प्रगाढम् ॥ १३ ॥
अभिनववयसा प्रक्षीबितो न्यायकर्ता
गुरुरुधनलुब्धोऽश्रद्दधानोऽस्य शिष्यः ।
पिशुन इह गृहस्थोऽपत्रपाऽलक्ष्यत स्त्री
नरपतिरविवेकी वञ्चकस्तस्य मन्त्री ॥ १४ ॥
नहि कुलगुणविद्याः प्राभवन्गौरवाय
द्रविणबलकुतत्रासत्यवाक्यैर्विनेह ।
अनवरतमसेवन्ताग्रजा वेदबाह्या-
न्स्वसुखमभिलषन्तः पौरुषं त्यक्तवन्तः ॥ १५ ॥
अकुरुत कुलबाह्यः स्वैरिणीवञ्चको दु-
ष्कृतरतमत उच्चैः पत्तने शून्यवादम् ।
नटविटभटतीर्थध्वाङ्क्षकापालिकैः प्रा-
णददवगतदेवागारमाचारहीनैः ॥ १६ ॥
जननुतकुलतोऽहं जातवानित्यहंयु-
र्विबुधसदसि जल्पन्नुत्तमात्मीयगोत्रम् ।
अभवदिह स गेहेशूर आजन्मदुष्टोऽ-
नवरतपरनारीलम्पटः सम्पदन्धः ॥ १७ ॥
अहरहरिह मेषान्कुक्कुटान्योधयित्वा
सततमधिकपूज्यान्दूषयित्वा मदेन ।
प्रतिदिनमुपदंशैरेष मद्यं निपीया-
गमयदवधिमात्मायुर्यथाजात इत्थम् ॥ १८ ॥

क्वचिदरमत सोऽयं जालिकव्याधनीचैः
क्वचिदलभत हेयं वेषमन्यालयेषु ।
क्वचिदवमतलज्जोऽवाङ्मिरीशानुकूलं
क्वचिदनुवदरिं किं वीरसूस्तस्य माता ॥ १९ ॥
रुचिरतरुणदासीमेलको वाजिमेधः
परयुवतिमुखाम्भोजेक्षणं राजसूयम् ।
फलमिह निजसौख्यं जीवितेऽनल्पमेव
प्रतिदिनमिति खट्वारूढ एष व्यजानात् ॥ २० ॥
ऋणमिह पिशुनेनादीयत स्वार्थवृद्ध्यै
परिजनभृतकेभ्योऽक्रीयताल्पोऽपि मत्स्यः ।
सुममधुफलशाकं देवसम्बन्धि सर्वं
बहुलकुवदपोष्ट्रा किंपचानेन तेन ॥ २१ ॥
श्रुतिसमुदितकन्यादानकालेऽपि मद्यं
तरसमिह गवां स प्राशयद्वेदबाह्यान् ।
तदपरिमितवस्वग्रस्य तद्विण्नृपालैः
प्रतिदिनमुरुधूर्तोद्योगिभिर्मन्त्रिमुख्यैः ॥ २२ ॥
श्रुतिरिपुकुलजाय स्वीयसम्पत्कुमारी-
मनुचितकरखिन्नां निर्दयः सोऽर्पयित्वा ।
अयमनिशमविन्दज्जीवनं तस्य हेतो-
रनृजुमतिरपि स्वश्मश्रुयुग्मं विधून्वन् ॥ २३ ॥
विधिनियमितकर्माक्षिप्य शश्वच्छवृत्त्या
क्षणिकधनमुपार्ज्य म्लिष्टमेवानुलप्य ।
अगमयदवसानं सोऽन्यजातीयवेषैः
प्रकटकपटशीलो जीवितं ब्रह्मबन्धुः ॥ २४ ॥
बहुलधनयुतश्चेद्दीर्घनामाभिधाय
स्वकुलनियतकर्मस्तोममाराद्विधूय ।

सकलपललभोजी सन्ततं मद्यपाय्य-
न्वसरदवनिदेवोऽसौ दिवाकीर्तिवृत्तम् ॥ २५ ॥
किमपि स नहि पश्यञ्जीवनोपायमन्यं
बहुयजनमिषेणार्थं जडान्भिक्षमाणः ।
प्रतिदिनमिह दारान्भूषणैर्भूषयित्वा-
दयमनयमजामालम्भयद्यायजूकः ॥ २६ ॥
उरुतरमिह दत्तं पादपूजाधनं चे-
दयमकुरुत दासीपुत्रगेहेऽपि भिक्षाम् ।
अनयमखिलबन्धून्स्वान्परिव्राडपुष्य-
त्सकलमतनियन्ताश्रान्तपीठाधिगन्ता ॥ २७ ॥
बहुधनपरधूर्तैः पूरिते धर्मगेहे
मुहुरिह विरचय्यानर्थकं कूटसाक्ष्यम् ।
अविदितनिगमार्थोऽजस्रमेषोऽग्रजातिः
समचरदुरुमूल्यक्रीतवादाधिकारः ॥ २८ ॥
सकलनिगमबाह्यं कर्षकं द्यूतकारं
भृतिभुजमिह कन्याविक्रयं सार्थवाहम् ।
द्विजकुलउरुवृद्ध्या जीवमाद्यूनमैक्षे
प्रकटकपटवेषं शिश्विदानं भ्रुकुंसम् ॥ २९ ॥
उदवहदिह वृद्धो निर्घृणः क्षीरकण्ठा-
मवृणुत कुलबाह्यः सम्पदन्धः कुलीनाम् ।
हतमतिरभिशस्तः प्राव्रजद्गूढभोगो
बहुलधनरतिर्धिग्ब्राह्मणं नाम शिष्टम् ॥ ३० ॥
सकलनिगमपुञ्जस्यायमस्यां मृषार्थं
पुरिविकृतवचोभिर्बोधितं बुध्यमानः ।
अवगणितधरित्रीदेवतो हीनवर्णोऽ-
प्रथयदमितगर्वं कद्वदः सम्पदन्धः ॥ ३१ ॥

श्रुतिनिगदितमार्गं नाजहान्निर्विशेषं
दृढमिह परपद्यां नह्यवालम्बतायम् ।
अमनुत बहुदुःखं नो सुखं मानवोऽद्या-
पकृतमुपकृतं दुर्वृत्त उन्मत्तचित्तः ॥ ३२ ॥
स जगदुपचिकीर्षुस्तर्कयन्नित्युदारः
क्वचिदपि परिगच्छन्मन्दमालोलदृष्टिः ।
प्रमदवनसमीपे गन्धवातेन हृष्टो
घनमधुररवेणागायदित्थं महात्मा ॥ ३३ ॥
जननि तव जनोऽतिक्रम्य वेदोपदेशं
प्रतिदिनमचरत्स्वच्छन्दहीनोहताशः ।
इति मुहुरभवस्त्वं सुष्ठु रोरुद्यमाना-
द्विजनिनदविलापैः सन्ध्ययोः कर्मभूमे ॥ ३४ ॥
अनिशमिह पुरा मे क्षत्रियोऽधत्त नाम
स्फुटतरमधुना तत्सर्ववर्णोऽप्यगृह्णात् ।
इति शिखरतरूणामाशुगेन श्वसित्वा
क्षितिभृदयममुञ्चन्निर्झराश्रुप्रवाहम् ॥ ३५ ॥
रुचिरमुरुगभीरार्थान्वितं तन्निशम्य
स्तनितमिव दविष्ठश्राव्यमक्लिष्टगीतम् ।
उपवनतरुकेलीलोलभूपालपुत्र-
स्तमविविदिषदार्यं साधु गायन्तमुच्चैः ॥ ३६ ॥
विकसितलपनेनानन्तरं जाङ्घिकेन
क्षितिपसुतभटेन प्रार्थ्यमानस्स विद्वान् ।
ललितधवलवर्णः सच्चिदानन्दपूर्णः
समचरदिव मन्दं मत्तमातङ्गपोतः ॥ ३७ ॥
स उपवनविशेषानद्भुतान्दर्शनीयान्
स्मितललितमुखाब्जो लक्षयन्सत्कवीन्द्रः ।

अभिनवबहुराजत्कल्पनामूहमानो-
ऽतरदवगतमार्गं तोषितप्राणिवर्गम् ॥ ३८ ॥
विनयनमितमूर्धद्वार्स्थितानीक्षमाणः
प्रकटितसचिवाद्यैरञ्जसा वन्द्यमानः ।
अनुपदमपि धन्यं स्वं मुदा मन्यमानो
नृपतिसुतचकोरायात्र सोऽपूर्णचन्द्रत् ॥ ३९ ॥
समतरुणवयस्कं स्वीयरूपानुकारं
सरसिजसदृशाक्षं सम्मुतं राजपुत्रम् ।
सविनयनतशीर्षं सोमबिम्बास्यमार्यं
सपदि तमवलोक्यासावसुख्यद्विजेन्द्रः ॥ ४० ॥
अवनिपतिकुमारोधारुणीदेवमौलिं
सहृदयमपि पुंसां मोहनाकारयुक्तम् ।
तमपरिमिततेजश्शालिनं सर्ववेदं
सकलगुणनिधिं सोऽवन्दतावाप्तकामम् ॥ ४१ ॥
द्रुतलयपरिमेयं गीतमुद्बुद्धतारं
बहुगुणललितं सङ्गाय वाग्गेयकारः ।
अनुपमकविराजोऽवक्सदाशीर्वचांसि
क्षितिपतिवरसूनोस्सप्रवृद्ध्यै सिताक्षः ॥ ४२ ॥
परिजन उभयोरन्योन्यसख्यं चिकीर्षो-
र्द्विजनृपसुतयोर्द्रागिङ्गितं बोबुधित्वा ।
मणिवलयवदेषोऽद्यैतयोरिद्धयोगोऽ-
भवदिति स समस्तो निर्भरानन्दमाप्नोत् ॥ ४३ ॥
तरुणपुरुषरत्नं सर्वविद्यासनाथं
क्षितिपतितनयस्स्वच्छन्दशीलं विदित्वा ।
सपदि स निजपित्रे दर्शयिष्यन्विनीतं
यवनहयमसावारोहयद्भूमिदेवम् ॥ ४४ ॥

गगनमणिरिव स्वच्छन्दभावोऽतिरस्य-
त्तिमिरमिव महानास्तिक्यमौरस्यदत्र ।
अकलयदिव तेजो ज्योतिरिङ्गोऽल्पविद्वा-
न्समचरदिव घूकः प्राङ्मतस्थापकारिः ॥ ४५ ॥
उडुगण इव शिष्टाचारवारो व्यराज-
त्तुहिनकिरणशोभेवाभ्युदैद्दैवभक्तिः ।
तत इव समफुल्लत्कैरवश्रीस्समन्ता-
दुरुतरनिरतिस्स्वच्छन्दजीवे जनस्य ॥ ४६ ॥
चतुरतरधरित्रीदेवतावाजिराजं
परिचितमिव धृत्वा लीलयासौ खलीनम् ।
सह नृपतिसुतेनास्कन्दिताक्लिष्टगत्या-
गमयदनरिबाधं सँल्लपन्राजसौधम् ॥ ४७ ॥
हयवरमथ हित्वा स्वस्तिकं सोऽतिरिच्या-
द्भुतकरबहुदीपैर्दीप्यमानो महात्मा ।
नृपतिसुतगृहीतस्वीयहस्तो मुदा प्रा-
विशदधिपगृहानारुह्य सोपानपालिम् ॥ ४८ ॥
सवयसमनिरुद्धं रूपवन्तं कुलीनं
कृतिनमवनिदेवं रञ्जकं लब्धवर्णम् ।
गुरुमिह भजनीयं मे पितोपादिशत्प्रा-
गभजमिति तथैवैत्संमदं राजपुत्रः ॥ ४९ ॥
सपदि स कृतकृत्यं पण्डितं भोजयित्वा
परिषदमथ नीत्वाकुण्ठितं राजकीयाम् ।
पितरमधिकविद्याकौतुकं स्वं वदान्यं
तमवनिपतिपुत्रोऽदर्शयद्भूमिदेवम् ॥ ५० ॥
द्विजतनयमुदारं सर्वविद्यावतारं
धरणिपतिवरेण्योऽश्मश्रुजातं विलोक्य ।

निटलघटितहस्तद्वन्द्व आर्यं प्रणम्या-
शुतममितमुदोपावेशयद्रत्नपीठम् ॥ ५१ ॥
रुचिरमुदमनायन्तार्यमालोक्य केचि-
त्सपदि तमगुरूयन्विस्मयं प्राप्य केचित् ।
अपरिमितमुदोपाश्लोकयन्ताशु केचि-
द्द्विजमणिमसुखायन्ताभिवन्द्यात्र केचित् ॥ ५२ ॥
अभिनवरुचिरोहा चित्रसत्काव्यसृष्टे-
रपि सकलजडानां मोहकृद्भानशक्तेः ।
प्रमदबहुलपारावारमध्ये न्यमज्ज-
न्नखिलविबुधवन्द्यस्यास्य राण्मुख्यसभ्याः ॥ ५३ ॥
कवितिलकमुपास्याथाऽच्छगत्यास्य सख्यं
हितकरमभिवाद्यासौ समस्तागमज्ञम् ।
स्वसुतमिव विभूष्य क्षोणिभर्ता स्वयं तं
सुखमुचितनिवासेऽवासयद्भूमिदेवम् ॥ ५४ ॥
उदभवदिव कल्यं प्रेमवेदाधिकारे-
ऽरटदिव बलिपुष्टोऽसम्प्रदायानुवादी ।
अरुणरुचिरिव स्वच्छन्दजीवे चिदासी-
दरजदिव रथाङ्गस्स्वीयदेशाभिमानी ॥ ५५ ॥
सततमनुचरन्तौ सर्वशास्त्रप्रमाणं
मुहुरभिजनयोगक्षेममालोचयन्तौ ।
द्विजसुतनृपपुत्रावध्यतिष्ठासतां तौ
बहुनिपुणतयैकग्रीवमुद्दिष्टकार्यम् ॥ ५६ ॥
स्वयमचिरमुपज्ञावैभवेनोपलभ्या-
श्चितचतुरगुरूणां बोधनेन प्रबुध्य ।
ग्रथितसकलविद्याचारभाषाजगत्या-
स्समजिगमिषतां तौ मन्दिरं स्वाधिपानाम् ॥ ५७ ॥

जगदधिपतिमन्वग्भूय गोपायितुं स्वे
बहुविदितयुवानौ प्रार्थ्य तौ देवदेवम् ।
न सुखमिति विदित्वा स्वैरितामन्तरेण
प्रथितदृढमनस्कावाप्नुतां धूमनौकाम् ॥ ५८ ॥
सांयात्रिकमातरेणाप्रीयेतां नाविकोत्तमम् ।
प्रीत्वा साप्तपदीनेन पोतवाहं सुहृद्वरौ ॥ ५९ ॥

तारके तृतीयः सर्गः ।

लिडधिकारः ।

अनुष्टुप् ।

धुन्वन्तौ देहसौख्याभिमानं धूममिव द्विजौ ।
श्रितांस्तारयितुं कोलां चक्रतुस्स्वौ भवाम्बुधेः ॥ १ ॥
चक्रपत्रे विधुन्वानश्चलदुच्चूडचूडवान् ।
प्लवः प्रबोधयामास ध्वनन्कुक्कुटवज्जनान् ॥ २ ॥
वातप्रकोपं शमयन्दीपयन्जठरानलम् ।
नौ तनोरूर्जयन्धातून्वैद्यामास स नाविकैः ॥ ३ ॥
अन्तर्दधौ मही दूरे प्रज्ञान इव संसृतिः ।
पयोधियाने दिक्कालभेद एव न दिद्युते ॥ ४ ॥
क्षयवृद्धी आशयस्य जन्मभूम्यन्यराष्ट्रयोः ।
क्रमशोऽनुबभूवाते जनैर्मातृकलत्रवत् ॥ ५ ॥
भेदं भेदं कूपकेन दिवमभ्याधरातलम् ।
खानं खानमकूपारं दारं दारं जगाम नौः ॥ ६ ॥
दिक्सूचियन्त्रमनसा कर्णधारात्मनान्विता ।
सर्वभूतमयी नौकेवाबभौ जलदेवता ॥ ७ ॥
उपरिष्टात्पार्श्वतोऽधो दर्पणीभूतवारिधेः ।
दर्शनाद्दिक्षु वियतस्सान्तराल इवाट नौः ॥ ८ ॥
उत्तानेऽब्धिस्सकालुष्यास्थिरताडम्बरान्वितः ।
अल्पज्ञ इव गम्भीरे बभूवाच्छस्सुधीरिव ॥ ९ ॥
अन्वग्भावं तरिं निन्ये सत्पथं सखिवन्मरुत् ।
भाग्येनापुश्चिरारोग्यं सर्वे नौयात्रिका अपि ॥ १० ॥
नूत्नकालमनुष्याणां समावेशस्सविस्मयैः ।
अहोरात्रं विदांचक्रे धूमनौकाप्रयातृभिः ॥ ११ ॥

अन्तस्समुद्रे भूमीध्रास्तस्थुर्नौकापकारिणः ।
सज्जनोपद्रवकरा राङ्वास इव सूचकाः ॥ १२ ॥
डोलायामिव वीच्यां स्त्री डोलयामास कच्छपी ।
विहङ्गम इवोल्लूपी संडिञ्ये गुणवृक्षकम् ॥ १३ ॥
बहुगम्भीरमध्येऽब्धेरासांचक्रे तिमिङ्गिलः ।
जीवनस्य क्षोभकारी लोभो राज्ञो यथा हृदि ॥ १४ ॥
चकासामास सीतेव तोयरेखा तरीकृता ।
पोताधानोद्भमो बीजवापेन सदृशो बभौ ॥ १५ ॥
जीवनक्षयसन्देहो बडिशानायवेदना ।
कुवेणीबन्धनं नात्र झषैरनुबभूविरे ॥ १६ ॥
कालः परस्परालापैर्भूतभाव्यर्थचिन्तनैः ।
जनैर्विचिक्षिपेश्चीतपिबतायां समुत्सुकैः ॥ १७ ॥
उदीच्यां द्योतनं भानोरवाच्यामपवारणम् ।
ईक्षामासे तदा नौका यात्रिकैर्दिग्भ्रमान्वितैः ॥ १८ ॥
सर्पिर्निधायं हित्वा स पानीयं क्लिष्टमानसः ।
तदानीं बुभुजे भिस्सां यावद्वेदंतरी जनः ॥ १९ ॥
अरुच्यं लवणङ्कारं जघास सतृणं जनः ।
स्वदेहधारणायान्नबुभुक्षुः क्लिशितो भृशम् ॥ २० ॥
भयङ्करस्तदा जज्ञे प्रतिकूलः प्रभञ्जनः ।
अभीक्ष्णमब्धिस्संक्षुभ्नन्क्षोभयामास तां तरिम् ॥ २१ ॥
प्रवेशयामास ततो गर्भं निर्विण्णयात्रिकान् ।
तर्या वितर्दिजठरं नाविकः कुक्कुटानिव ॥ २२ ॥
वायुसंक्षुभिताम्भोधिर्यदा शान्तिमुपेयिवान् ।
निष्खेदेव तदा नौका रेजे स्वाधीनभर्तृका ॥ २३ ॥
दरिद्रैरिव सम्पत्ती रुग्युतैरिव वार्तता ।
अनुबोभूयाम्बभूवे यात्रिकैरभयस्थितिः ॥ २४ ॥

अथैकस्मिन्सुप्रभाते मित्रेण सह तारकः ।
अवरोहन्धूमतर्या अधितष्ठावुरुप्लवम् ॥ २५ ॥
यातायातोडुपश्रेणी नौका तीरान्तराम्बुधेः ।
निम्नोन्नततरङ्गेषु दृश्यादृश्यस्थितिं ययौ ॥ २६ ॥
जन्मस्थाने स्वाधिपानां विहर्तुमुपचक्रमे ।
मित्रद्वयं महोत्साहफुल्लाननसरोरुहम् ॥ २७ ॥
चन्द्रद्वीपे नित्यभद्रां स्वतन्त्रप्रभुपालिताम् ।
पुरीं चन्द्रमतीनाम्नीं तावुभावधिजग्मतुः ॥ २८ ॥
प्रोवाह पृथुलावाच्यां चन्द्रकान्तेति विश्रुता ।
चित्रसेतुर्नित्यनाव्या बहुजीवनदा नदी ॥ २९ ॥
पञ्चयोजनविस्तीर्णा शतलक्षजनावृता ।
भूगोले बहुना किं सा पुरी पुरमतल्लिका ॥ ३० ॥
चन्द्रिकाधवलच्छायास्तत्रत्या रेजिरे जनाः ।
सर्वसर्वंसहाचक्रप्रतिपालनदीक्षिताः ॥ ३१ ॥
अन्योन्यमैत्रीं कुर्वन्तस्संजानन्तो यथायथम् ।
प्रियप्रियेण यच्छन्तः किरन्तश्शुक्लशुक्लभाम् ॥ ३२ ॥
विद्यया समयाकृत्य प्रियाकृत्य मुहुर्गुरून् ।
आत्मनो राजसात्कृत्वा दुःखाकृत्य विरोधिनः ॥ ३३ ॥
चारित्रतोऽतिगृह्णन्तो व्यथमाना न वृत्ततः ।
भवन्तो दीनतोऽजस्रं जीवन्तो देवतःप्रति ॥ ३४ ॥
एकतानास्सांयुगीना वाग्मिनो हृदयालवः ।
क्षेमङ्करा महोत्साहा उरस्वन्तो यशस्विनः ॥ ३५ ॥
समानपङ्क्तिभोक्तारस्समवर्णविभूषिताः ।
सामान्यभाषावक्तारस्समानाचारवर्तिनः ॥ ३६ ॥
वयःपरिणयं स्त्रीणां विद्याभ्यासं स्वतन्त्रताम् ।
प्रापयन्तोऽवतन्वन्तस्स्वराज्यविहितोद्यमान् ॥ ३७ ॥

सामाजिका आस्तिकास्सत्कुलीना धार्मिका बुधाः ।
शाकाहारा वावदूकाः कृतिनः पुरुषोत्तमाः ॥ ३८ ॥
तत्रत्यिका बभूव स्त्री वीरमाता सुलक्षणा ।
गृहकार्यपरा प्राज्ञी बुधमान्या पतिव्रता ॥ ३९ ॥
वीथीर्विशाला अमला जलयन्त्रपरिष्कृताः ।
निषद्यास्तौ ददृशतुस्सर्ववस्तुसमन्विताः ॥ ४० ॥
सौधास्समुन्नतारम्या अद्भुतारामदीर्घिकाः ।
नानाविधाश्शिल्पशालास्ताभ्यामीक्षाम्बभूविरे ॥ ४१ ॥
आकाशयानानि धूमशकटांस्तौ मनोजवान् ।
तन्त्रीवार्तावहांस्तत्र लुलोकाते महाद्भुतान् ॥ ४२ ॥
ततः पौरान्वशीकर्तुं गेयं तद्देशभाषया ।
गायन्तौ तावुभौ तत्र प्रतोलीषु विजह्रतुः ॥ ४३ ॥
समुन्नतौ तावाजानुबाहू सर्वाङ्गसुन्दरौ ।
बहुतेजस्विनौ दृष्ट्वा मुमोह नगरीजनः ॥ ४४ ॥
तत्सौन्दर्यं तदौन्नत्यं तत्तेजस्तत्पराक्रमः ।
तत्तारुण्यं तत्प्रतिभा मुमोष जनमानसम् ॥ ४५ ॥
द्वितन्त्रगौलक्षणिकमीमांसकसवार्तिकान् ।
पराजिग्याते धार्मिकवैयाकरणतार्किकान् ॥ ४६ ॥
लोकैकवीरौ तौ सर्वतन्त्रौ स्वातन्त्र्यशालिनौ ।
सिंहसंहननौ द्रष्टुमियेष नगरीश्वरः ॥ ४७ ॥
हैयङ्गवीननिष्ठानकूर्चिकामस्तुसंयुतम् ।
स्नातानुलिप्तौ मृष्टान्नं बुभुजातेऽथ सात्विकम् ॥ ४८ ॥
प्रसाधितौ तौ रोचिष्णू वेषेण समयोचितौ ।
विशेषकभ्रमरकस्फीतफालौ रराजतुः ॥ ४९ ॥
महाधननिशाराप्रपदीनांशुकसुन्दरौ ।
ग्रैवेयकोर्मिकादेवच्छन्दकुण्डलभासुरौ ॥ ५० ॥

तौ चार्वनुपदीनाविराजच्चरणसारसौ ।
स्वच्छक्षौमोष्णीषरम्यौ धृतकालोचितायुधौ ॥ ५१ ॥
पारसीकौ वयस्यौ तावारुह्य द्राङ्मनस्विनौ ।
जग्मतू राजसदनं युवानावकुतोभयौ ॥ ५२ ॥
सायाह्नि सुपन्थानं गच्छन्तौ दर्शकैः सह ।
संशोधितहिमानीकं लक्षयामासतुः सभाम् ॥ ५३ ॥
अध्यासीनं भद्रपीठं पृच्छन्तं मन्त्रिणः कृतीः ।
प्रकृत्या सुन्दरं वीक्षांचक्राते चक्रवर्तिनम् ॥ ५४ ॥
आलोक्य सार्वभौमस्तौ प्रत्युत्थानपुरस्सरम् ।
व्यूढोरस्कौ ततस्ताभ्यां ददौ समुचितासने ॥ ५५ ॥
पूर्णेन्दुबिम्बसदृशी पश्यन्तोऽपि मुहुस्तयोः ।
दर्शनीयानने सभ्या नापुस्तृप्तिं सविस्मयाः ॥ ५६ ॥
उररीकृत्योपहारं नमस्कारपुरस्कृतम् ।
तयोरुदन्तं पप्रच्छ सार्वभौमः सविस्मयः ॥ ५७ ॥

उपजातिः ।

महाभिरूपौ विनयान्वितौ तौ
वदावदौ भारतवर्षदीपौ ।
प्रचक्रमाते गदितुं स्ववार्तां
धीरावुदारौ जगदेकवीरौ ॥ ५८ ॥

तारके चतुर्थः सर्गः ।

स्रग्धरा ।

सृष्ट्यादावाविरासीत्तरुविमृगनृणां संश्रयो यो हिमाद्रि-
र्वेदद्रष्टृषिसेव्या विलसति तदवाक्पार्श्वतः कर्मभूमिः ।
साद्याधीश त्वदीयाखिलधनकलिता नावभूत्तत्र जन्म
ब्रह्मक्षत्रौ स्व आवां तव यदि करुणा स्याद्भवेवप्रतीतौ ॥ १ ॥

वसन्ततिलका ।

धर्मं सदान्ववसितेन भवत्खगेन
देशेऽद्य नः कुजनदण्डतमोनिरस्तम् ।
सच्चक्रसम्मद उरीकृत आततायि
घूकोरुभीकररवः सुतरां विलुप्तः ॥ २ ॥

पुष्पिताग्रा ।

सकलधरणिपालका अनु त्वां
तव न नभोमणिरस्तमेति राज्ये ।
त्वयि महिमवति प्रभो कवीन्द्रा-
भिहितजडोऽपि विशारदायतेऽद्य ॥ ३ ॥

अनुष्टुप् ।

सिंहलाब्धौ मौक्तिकन्ति तुहिनन्ति हिमालये ।
वज्रन्ति गौतमीतीरे यशांस्यद्य विभो तव ॥ ४ ॥

द्रुतविलम्बितम् ।

न नृबलिः क्वचिदप्युरुभीकरः
ग्रहणनं न चितौ कुलयोषिताम् ।
भरतवर्षतले नरविक्रयो
नहि कृपा निलये त्वयिशासति ॥ ५ ॥

भुजङ्गप्रयातम् ।

पशूनां विना हिंसयैवातिदूरं
नृवार्ताचितान्यङ्घ्रिणो द्राङ्नयन्ति ।
मरुर्वप्रतीहापि राज्ये त्वदीये
धियाऽसाधनीया क्रिया नास्ति लोके ॥ ६ ॥

स्वागता ।

निम्नगाः प्रतिहताः कठिनाल्या
जीवनं ददति दूरजनाय ।
कृत्रिमाल्पनदविस्तृतहस्ताः
पीडयैव ददते वसु लुब्धाः ॥ ७ ॥

शार्दूलविक्रीडितम् ।

षट्कर्मावगता द्विजातय इलागुप्त्युद्यताः क्षत्रिया
गोरक्षाकृषिविक्रयक्रयपरा वैश्याः सदाराधकाः ।
शूद्रा वर्णचतुष्टयप्रकटिता ये भारतीया जना-
स्ते दुष्टाधिपदूषिता अपि पुनश्शुद्धिं लभन्ते त्वया ॥ ८ ॥

भुजङ्गप्रयातम् ।

कुलस्त्रीं हरन्भूमिदेवं प्रणिन्द-
न्हणन्देवगेहं दहन्पत्तनानि ।
शकाधीश्वरो भारतैश्वर्यमाप-
ज्जनो नान्यदुःखं विनैति स्वसौख्यम् ॥ ९ ॥

पृथ्वी ।

यथेष्टमतवृत्तयस्तव जना भजन्ते मुदं
समक्षमधुनाभयाः प्रतिवदन्ति धर्मं प्रभुम् ।
सुवर्णमपि मुष्यते न बहुविच्युतं चत्वरे
सदा नहि सुखायते कथमभिज्ञराज्ये जनः ॥ १० ॥

शिखरिणी ।

अमात्याः सर्वज्ञाः पिपुरति सदा कर्मसचिवा
महामात्रा धीराश्चतुरमनसोऽमी प्रणिधयः ।

पुरोधोऽध्यक्षाः सन्नुतपृथुलवैदग्ध्यकलिता
यशोभिः साम्राज्यं तव सकलभूपालकमणे ॥ ११ ॥

हरिणी ।

भृशमभिजनोऽस्माकं यस्ते कृपाप्रतिपालितो
बहुसुखधनं लब्ध्वा त्वां सोऽर्चति प्रियपुत्रवत् ।
इह सवयसौ धन्यावावां त्वदञ्चितसम्मुखं
द्रुतमुपगतावित्थं स्वामी प्रमाणमितः परम् ॥ १२ ॥

मन्दाक्रान्ता ।

श्रुत्वा वाचो नृपतिरमुयोर्भावगूढा मनोज्ञा
यूनोर्बुद्धिं भुवनविदितां विस्मितः सन्परीक्ष्य ।
देवत्रामू इति स गणयन्सैन्यपत्यं प्रदातुं
मेनेऽमूभ्यामनघचरिता माननीया भवन्ति ॥ १३ ॥

उपस्थिता ।

आत्मन्यधिकाविति मन्यमान-
स्ताभ्यां प्रसितोऽनघचक्रवर्ती ।
शश्वन्निपुणः सभवंस्तयोस्ते-
मित्रे सदसीत्थमुवाच साधुः ॥ १४ ॥

गीतिः ।

सुलभौ देवाविव मे
संप्राप्तौ सर्वथेह मयि साधू ।
महतां विदेशगमनं
भवति नितान्तं परोपकाराय ॥ १५ ॥

मत्ता ।

सञ्जातौ मे महति भवाद-
ग्वीरौ धीरावखिलगुणाढ्यौ ।
मच्चित्तं गर्वति मम सेव्यौ
प्राप्तावाप्ताविति जनवन्द्यौ ॥ १६ ॥

भुजङ्गप्रयातम् ।

मुदाद्यप्रभृत्यस्म्यहं युष्मदीयो
युवामर्हथश्चक्रवर्तित्वमाप्तुम् ।
भवन्तौ ममातीव मित्रे भवेता-
मताप्सीदमू इत्यसौ सार्वभौमः ॥ १७ ॥

स्रग्धरा ।

ताभ्यां कारिष्यमाणं स्वविषयसुभगम्भावुकं कर्म सभ्य-
स्तोमोऽगच्छद्दिदृक्षुर्निजसदनमिलापालकस्यापवादात् ।
प्रासादं तौ वयस्यौ पृथुमधिवसतः सार्चितौ जागरूकौ
स्वाधीनं स्यान्नराणामखिलमपि जगद्भाग्यसंयोजितानाम् ॥

पञ्चचामरः ।

कुमारिकाः प्रियौ कुलाङ्गनाः सहोदरौ सुहृ-
द्वरौ युवान इत्यतीव पुत्रकौ जरज्जनाः ।
तदाह्वयन्त तावुभावशेषलोकसम्मतौ
द्विषन्ति के महीतले नितान्तसद्गुणान्वितान् ॥ १९ ॥

चन्द्रलेखा ।

मासोऽयासीत्तयोरत्रैव क्षणो राजकीयो-
द्योगैः सर्वप्रजानां वश्यक्रियाकल्पनाभिः ।
श्रुत्वा राजानुजो दुर्हृद्भिर्निबद्धो हठात्ता-
वित्यापद्भान्धवावीदृक्सार्वभौमं स्म वक्तः ॥ २० ॥

हरिणप्लुतम् ।

आश्चर्यं जगतीपते तव दुर्हृदां किमु पेषणं
त्वत्केऽत्र प्रिययुग्म ईदृगरिंदमे सति जीवति ।
माशोचीरचिरेण तेऽश्चितसोदरं जितशात्रवं
द्रष्टासि प्रमदेन नौ रिपुमर्दनेऽद्य नियोजय ॥ २१ ॥

चन्द्रलेखा ।

शिष्टिम्भूपस्य लब्ध्वा भूदेवताक्षत्रवीरा-
वाचार्याणां स्मरन्तौ सञ्चित्य सैन्यं प्रशस्तम् ।

पारापारं तरन्तौ द्राग्धूमनौकाधिवासा-
त्तावाराच्छत्रुदुर्गाद्यातः स्म धीरौ निशीथे ॥ २२ ॥

शिखरिणी ।

पुरः पश्चाच्छत्रुर्नृपतिमुदधिश्लिष्टसरिति
न्यरौत्सीत्तं पार्श्वे समचरदुदासीनजनता ।
प्रतीच्यां प्राच्यां द्विट्पटलमथनं कर्तुमनसौ
द्विधा कृत्वा सैन्यं त्वरितमयतेतां द्विजवरौ ॥ २३ ॥

श्येनिका ।

अग्रतो रिपून्स्वामित्रसैनिका
मर्दयन्त इत्यधीशसोदरः ।
द्वीपमध्यदुर्गरक्षितो विद-
न्नन्वगाज्जघान शत्रुमण्डलम् ॥ २४ ॥

सुभद्रकम् ।

चौर इव प्लवोऽम्बुपिहितस्तरीरकृत भस्मसाद्भुतगति-
स्सीसकगोल इन्दुसदृशः स्फुटन्जनशतान्यनीनशदुरुः ।
आयसधूमनौ समुदयश्शतघ्युपगमैर्बभूव दलितः
कृत्रिमविद्युदद्भुतकराग्निनादहदमोघयोधनिवहम् ॥ २५ ॥

स्रग्विणी ।

मज्जनोन्मज्जनैर्लोहनौकापयो
वायसीवाचलद्वारि मायाविनी ।
दह्यमानोडुपाग्निच्छटालीलया
सा तमिस्रा विभाति स्म मध्याह्नभा ॥ २६ ॥

आर्यागीतिः ।

आसन्नविंशयोजन-
विस्तीर्णनदीस्थशत्रुनौद्विसहस्रम् ।
सद्विड्जनसर्वस्वं
भारतवीरप्रतापध्वस्तम् ॥ २७ ॥

अनुष्टुप् ।

अभ्यमित्र्यौ सांयुगीनौ धीरौ भरतवर्षजौ ।
समूलघातं प्रत्यर्थिसेनं द्वीपस्थमाहताम् ॥ २८ ॥

शार्दूलविक्रीडितम् ।

उल्कावद्धुतप्तसीसगुलिकाश्रेणी मुहुः पातिता
दोषाभूतमहश्शतघ्यतिसरद्धूमान्धकारान्वितम् ।
भेरीभांकृतभर्त्सनैः प्रतिभटप्राणार्थमूर्जस्वलः
कालोऽचूचुरदारुराव रुधिरं पीत्वा शिवासंहतिः ॥ २९ ॥

अनुष्टुप् ।

अतुलाहंपूर्विकाविभीषणाहमहमिका ।
अहोपुरुषिका सासीदहोरात्राहवक्रिया ॥ ३० ॥

शम्भुनटनम् ।

महारणभुवि त्रुटितपादयुगलैर्लुलितबाहुभिरपास्तनयनै-
ररोद्यरिजनैरसकृदस्त्रपतितं गजहयं समततार्तनिनदम् ।
रथायुधमणीखचितभूषणपटैर्व्यपणयत्समरभूमिरखिला-
ण्यबीभिषत जन्तुपटलं पलरतं बहुभयङ्करकबन्धनटनम् ॥३१

क्रौञ्चपदा ।

व्याकुलयुद्धे परस्परमेव भीकरारिपव उपसि मुहुरतुद-
न्द्राग्घतशेषा महाभयकम्पिताश्शरणमयुरधिकरणजयिनाम् ।
बाहुगणाहिव्रजं चरणोत्करोरुकमठपरिकरमसितशिरो
रुट्चयशैवालसञ्चयमद्भुतं रुधिरजलमभवदमितसरः ॥ ३२ ॥

तन्वी ।

कृत्तपदोऽपि प्रतिभटमवधीद्योधवरस्सपदि जहि जहीति
क्रुद्धमनंसीद्विजयिनमसुहृत्कश्चिदनूनयुधि नमनमेति ।
शत्रुमहार्षीद्भुतगतिचतुरः प्राप्तजयो झटिति हरहरेति
क्षिप्रमनावीद्विजयुगमतुलं सैनिकपङ्क्तिरथ नुहिनुहीति ॥३३॥

शिखरिणी ।

क्वचित्केशाकेशि व्यथितचिकुरो भिक्षुक इव
क्वचिन्मुष्टीमुष्टीवहतदशनोऽवित्तदशमी ।
क्वचिद्बाहाबाहि प्रशमितबलो वातकिसमः
क्वचिद्दण्डादण्डि द्विडसृगमितो रोचन इव ॥ ३४ ॥

मत्ताक्रीडा ।

वेगोद्यद्धूमानोऽभेद्यं समचलयदसमशितशरपटलं
यत्त्रं भूम्यां निक्षिप्तं प्रास्फुटदमितभटवरहृदयभयदम् ।
अश्वीयं पादातं शत्रुं स्म तमयति तमतुलितमदगजता
मेघद्वाराद्येधश्रेण्यक्षिपदसकृदखिलगतिशुचिगुलिकाः ॥३५॥

मत्तेभम् ।

पादातकौन्तिकभटक्षत्रुहास्तिपकसाहस्रचर्मिरथिका-
श्चारोहकावचिकशाक्तीकहैतिकधनुष्मन्मयारिपृतना ।
वीरोत्तम द्विजवरेण्यप्रतापशिखिनष्टा पतङ्गततिव-
द्दुर्हृच्चमूपतिरजय्योऽपि भारतभुजा शौर्यपञ्जरगतः ॥ ३६ ॥

सुमुखी ।

युवराजमथेक्षितुं क्षत-
व्यथितं विजयप्रमोदितम् ।
शिबिरेऽभ्रमतां सुहृद्वरौ
कृतिनौ महिदेवभूभुजौ ॥ ३७ ॥

मत्तमयूरम् ।

शय्याधीनं नीरपिपासुं क्षतबाहुं
तावात्मानौ लोकितुमिच्छुं रणधीरम् ।
रक्तस्रावाद्वक्तुमशक्तं बहु दृष्ट्वा
दुःखातीतावप्यणुमात्रं रुदितस्म ॥ ३८ ॥

उपस्थितम् ।

द्विजातिमणिमुर्वीभृद्वतंसो
जगाद करुणार्द्रस्वान्त इत्थम् ।

दयामयमहात्मन्भूमिदेव
त्वमर्हसि चिकित्सां कर्तुमस्य ॥ ३९ ॥

मन्दाक्रान्ता ।

अस्मत्स्वामी सहजसदृशः सार्वभौमानुजोऽयं
श्रान्तश्शस्त्रक्षतनिजभुजोऽप्यावयोः सङ्गमिच्छुः ।
सर्वज्ञस्त्वं स्ववचनमवप्राणयैनं महात्म-
न्न स्यादीदृग्विजयमहिमास्माद्विना सार्थकोऽद्य ॥ ४० ॥

मौक्तिकमाला ।

शस्त्रचिकित्सां झटिति स कुर्व-
न्नौषधमस्मै तदुपरि यच्छन् ।
वार्तमकार्षीदमुमतिवेलं
तत्क्षणकालेऽद्भुतमदिमाढ्यः ॥ ४१ ॥

लक्ष्मीः ।

तिलकयकृत्प्लीहकशेर्वात्रुधिरपललहृदयमन्या-
धमनिकपालं क्षितिदेवः प्रकृतिमगमयत परिशोध्य ।
स सपदि मूर्छालमभीक्ष्णं नरपतिसहजमुदमिमील-
त्प्रथितनृपालोऽन्नबुभुक्षुः सरभसमघसदमृतपथ्यम् ॥ ४२ ॥

उपजातिः ।

आप्तासुरत्यद्भुतवैद्यदत्त-
जीवातुहेतोर्युवराजचन्द्रः ।
भवन्स उल्लाघ उपोढदेह
उवाच वाचं मधुरां महान्तौ ॥ ४३ ॥

चञ्चरीकावलिः ।

नृसिंहौ मत्प्राणत्राणदीक्षागरिष्ठौ
भवन्तौ वन्देऽहं भारतीयावतंसौ ।
भवच्चारित्रं सन्देशपारावतेभ्यो
मयाज्ञायि प्रत्यक्षं युवामद्य वीक्षे ॥ ४४ ॥

चन्द्रलेखा ।

साम्राज्यं कीर्तिरावीत्थं सार्वभौमस्य दुर्हृ-
त्सेनायाश्शौर्यमद्यैवाध्वंसि सर्वं भवद्भ्याम् ।
अन्वाजेकृत्य खिन्नोऽहं प्राणिषि द्राङ्महद्भ्यां
देवौ किम्मानवौ बह्वाश्चर्यतेजःप्रतीतौ ॥ ४५ ॥

तोटकम् ।

अनशिष्यमहं स्वबलेन समं
न युवामभविष्यतमत्र यदि ।
सफलं स कृषीष्टतमां युवयो-
रचिराय मनोरथमस्मदिनः ॥ ४६ ॥

अलोला ।

पाणौकृत्य जयार्थं रक्षन्तौ पृतनां मां
भूभर्तारमुपेतां मत्सोदर्यमतन्द्रम् ।
इत्थं भारतवीरौ विज्ञप्तौ युवराजे-
नानन्दाम्बुधिमग्नेनात्यन्तं कुशलेन ॥ ४७ ॥

उपजातिः ।

अवश्यकार्याण्यचिरेण कृत्वा
सत्कृत्य सैन्यं महितान्नपानैः ।
राजानुजाज्ञां प्रतिपालयन्तौ
चन्द्रान्तरीपं सहसापतुस्तौ ॥ ४८ ॥

भुजङ्गविजृम्भितम् ।

दृग्यत्रेण प्रेक्ष्यानीकं स्वमखिलधरणिपरिवृढो जयध्वजभूषितं
हृष्ट्वात्मानन्दं भेरीभिस्सकलनगरनरनिकरं वदन्पुटभेदनम् ।
सोऽलङ्कृत्याभ्युत्थानायागमदमितहितजनयुतस्तरङ्गचलत्प्लवा
तिक्रान्ताब्धौ क्रोशद्वन्द्वं सुखकरपवनपुलकितो महाविभवान्वितः ॥

पञ्चचामरः ।

सहस्रनावरूप्यसैन्यतल्लजं जयध्वजा-
न्वितं जगन्नुतो विलोक्य सार्वभौमसत्तमः ।

ಪುಟ್ಟುಲ ಸಂಖ್ಯೆ..... P2860

प्रहृष्य सोऽधिरुह्य नौमचर्चिकां स्वसोदरे-
ड्यमानभारतीयशेखरावपश्यदुत्सुकौ ॥ ५० ॥

शिखरिणी ।

महाब्रह्मं नत्वा विजयमुदितं क्षत्रियमणिं
परिश्लिष्य प्रेम्णा सुखिनमथ संचुम्ब्य सहजम् ।
अतीवानन्दाश्रुप्लुतनयनयुग्मो नरपति-
स्स योधानप्राक्षीदसकृदखिलान्नित्यकुशलम् ॥ ५१ ॥

वातोर्मी ।

पूर्वाह्णेऽसावगमद्राजधानी-
मानन्दाम्भोधिनिमग्नो महीशः ।
पौरैश्शश्वज्जयतूर्यैस्समन्ता-
त्स ब्रह्मक्षत्रियसोदर्य ऐडि ॥ ५२ ॥

शिखरिणी ।

बहुश्रेयान्कालोचितसकलकृत्यान्यवनिपः
स्समाप्यासौ सिंहासनमधिवसन्सभ्यनिवहम् ।
बभाणेत्थं यूयं शृणुत परिषद्या मम वचो
विलोक्येतामेताविह भरतवर्षोद्भवमणी ॥ ५३ ॥

वैश्वदेवी ।

अष्टाविंशत्यक्षौहिणीं द्वेषिसेनां
हत्वासद्राज्यं सोदरं रक्षतस्स्म ।
आभ्यां कः कार्योऽस्माभिरद्योपचारः
किं किम्वुक्तं सत्पार्षदा धर्मशास्त्रैः ॥ ५४ ॥

शुद्धविराट् ।

स्यात्तज्जन्मसदाप्यनर्थकं
यस्मिन्नास्ति कृतज्ञता नरे ।
यः प्रीणीतमहोपकारिणं
सश्लाघ्येत समस्तसज्जनैः ॥ ५५ ॥

अनुष्टुप् ।

भगवन्तं नित्यतृप्तं जीवन्मुक्तं द्विजोत्तमम् ।
कथमेतं तोषयेयं नश्वरैहिकवैभवैः ॥ ५६ ॥

उपजातिः ।

समस्तविद्यानिधिरिद्धकीर्ति-
रखण्डतेजा भुवनोपकारी ।
इतः परं ब्राह्मणवर्य एष
भवेन्ममप्राणसखो महात्मा ॥ ५७ ॥

वितानम् ।

इतः परं ब्राह्मणस्यादहिंसनीयः प्रजासु ।
मदीयराज्ये विदध्यात्करं न तस्यैव वृत्त्याः ॥ ५८ ॥

अनुष्टुप् ।

आचन्द्रतारकं विन्देद्वंश एतदुपक्रमम् ।
मद्भागधेये द्वात्रिंशत्सुवर्णान्प्रतिवासरम् ॥ ५९ ॥

उपजातिः ।

सर्वस्वतन्त्रो बहुसाधुकर्म-
धर्माधिकार्येष सखा मदीयः ।
निरङ्कुशो ब्रह्मकुलाग्रगण्यो
राज्येऽखिले मे विहरेदजस्रम् ॥ ६० ॥

वितानम् ।

दिवस्पृथिव्यावजस्रं प्रशासितुं शक्त एषः ।
गुणोज्ज्वलः क्षत्रियेन्द्रो भवेन्मदीयात्मबन्धुः ॥ ६१ ॥

मौक्तिकमाला ।

भारतवर्षं तदखिलमेषोऽद्यप्रभृति स्वैरमुपभुनक्तु ।
इत्थमुदित्वा स निजकुमार्या आगमनं संसदि विभुरैषीत् ॥ ६२ ॥

प्रहर्षिणी ।

जङ्घालो नृपतिभटो न्यवेदयत्तां
राजाज्ञां प्रमदकरां पतिंवरायै ।
पद्माक्षी जलदकचा सुवर्णगात्रा
सोत्कण्ठास्स भवति सा विराट्कुमारी ॥ ६३ ॥

तारके पञ्चमः सर्गः ।



प्रहर्षिणी ।

पश्यन्ती नृपतनया सभां गवाक्षा-
द्ध्यायन्ती पितृवचनप्रयोजनं सा ।
मात्राम्भोरुहवदना विभूष्यमाणा-
शोभाढ्या त्वरितमनोरथौ हतेत्थम् ॥ १ ॥
स्यात्तच्चेज्जगति तथाहमेव धन्या
किं देवः श्रितजनलालसां न देयात् ।
माता मे सपदि समीड्य तद्यशांसी
दृक्साहन्यहनि करोति कर्णपर्व ॥ २ ॥
तस्मै मे स्पृहयति मानसं मदीयं
लावण्यं भवति हितं न किं विराजे
भाग्यायैव मम स आगतः कृतार्थो
मत्पित्रेऽरुचदधुना तदीयमैत्री ॥ ३ ॥
तद्वीर्यं तदमलराजवर्चसं त-
त्सौन्दर्यं तदभिनवं वयः प्रशस्तम् ।
तद्धैर्यं तदतुलकीर्तिवैभवं का
लोकित्वा सपदि पतिंवरा न मुह्येत् ॥ ४ ॥
नूनं यत्प्रभृति मया विराडलोकि
स्वान्तं मे परितपतीदृशं तदादि ।
जीवेयं यदि कृपया स उद्वहेन्मां
किं जाने परहृदयं सदापरोक्षम् ॥ ५ ॥
इत्थं सा बहुभवितव्यमूहमाना
वेषेणाचिरमबलाञ्जसा कृतेन ।

निस्त्रिंशीकृतसहजस्फुरत्कटाक्षै-
र्व्यच्छैत्सीत्प्रतियुवगाढधैर्यबन्धम् ॥ ६ ॥
शृङ्गारस्तरुणसभासदां तरुण्याः
प्राभूद्बृद्धनधनपश्यतोहरः सः ।
चन्द्रेशस्सरसिजलोचनां तदैषोऽ
हर्षीत्स्वान्तिकमुपवेश्य पुत्रिकां ताम् ॥ ७ ॥
वामोरूर्निजजनकेन भाष्यमाणा
ह्रीभारावनतमुखी क्षणप्रसूनैः ।
सानन्दं प्रियपदपीठमर्चयन्ती
पित्रेऽदात्प्रतिवचनानि मन्दमन्दम् ॥ ८ ॥
वामाक्षीं नृपतिकुमारिकां सुगुल्फां
रम्योष्ठीं स्मितवदनां ससावहित्थाम् ।
राजन्यो भृशमखिलाङ्गशोभनां ता-
मीक्षित्वा सपदि विमोहितो बभूव ॥ ९ ॥
मित्रस्य प्रियतमभावपद्धतिं तां
सर्वज्ञो झटिति सतारको विदित्वा ।
ईक्षित्वा परमसखा यतिष्ठमानां
प्राहर्षीत्क्षितिपसुतां सरोजनेत्राम् ॥ १० ॥
उद्वोढुं प्रभवसि चक्रवर्तिकन्यां
स्त्रीरत्नं शृणु तदवश्यमाप्यमेव ।
शङ्किष्ठाः प्रियसख मा त्वमार्य वन्द्ये-
त्यत्यन्तं हितमभणत्स विप्रमौलिः ॥ ११ ॥
राजन्यं स्म वदति सार्वभौम इत्थं
मत्कन्याद्य भरतवर्षराज्यलक्ष्म्याः ।
सापत्न्यं भृशमभिलष्यते भवाद्द-
ग्जामाता मम निखिलं कुलं पुनाति ॥ १२ ॥

प्रालेयाद्रिलसदुदङ्मितम्बदेशं-
पूर्वं नः पितृकुलमावसच्चिरस्य ।
यस्मादीदृगरचि पुस्तकेषु तस्मा-
दस्माकं समुचित एव बन्धुभावः ॥ १३ ॥
मह्यं कोऽपि मम विराण्मणिस्सतीर्थ्य-
स्त्वां पुत्रीमुपरतमातृकां रहस्ये ।
संदाय त्रिदिवमगात्पुरा मदर्थं
युध्वा मे प्रियतमदत्तपुत्रिकेयम् ॥ १४ ॥
मात्रास्या मुहुरहमित्यभाषिषीयं
नित्यं त्वद्गुणगणचिन्तनामृतेन ।
सञ्जीवन्त्यधिकुरुते सदान्नपाने
मद्बाला सहृदयते तपस्यतीत्थम् ॥ १५ ॥
श्रुत्वा तद्धितकरचक्रवर्तिवाक्यं
प्रत्यूचे चतुरमतिस्स भूमिदेवः ।
नाथैतैष नरपते भवत्कुमार्याः
को मुच्येत्स्वकरगतामभीष्टलक्ष्मीम् ॥ १६ ॥
अन्योन्योचितगुणरूपयौवनाढ्यौ
संयुक्ताविव धनवृद्धयुदारभावौ ।
दिष्ट्यैतौ मधुरवधूवरौ कुलीनौ
भूपायं शुभदिवसो वयंकृतार्थाः ॥ १७ ॥
आशंसे जननुतवीरसूर्भवेस्त्वं
मङ्क्षुक्ष्मापतिरिति पुत्रिकां ब्रुवाणः ।
कह्लारस्रजमभितो गलं विराज-
स्सम्प्रीत्या सदसि तयासयाम्बभूव ॥ १८ ॥
कामो मे त्वमिव करेण नाङ्कनान्या
गृह्येतेति भरतवर्षराज्यलक्ष्म्याः ।

हस्ताग्रं निजमभिगृह्णतो विराजो
दृष्ट्यायौद्दृगवनिपालकस्य पुत्र्याः ॥ १९ ॥
पाणीक्षाहृदययुगानि मेलयन्तौ
द्रागेतौ सकलविधैस्समासजेताम् ।
ज्योत्स्नेन्दू इव निरतानुबन्धयुक्तौ
स्यातामित्यमनुत तत्सदस्यपूगः ॥ २० ॥
सम्पूर्णोडुपकलिता यथा त्रियामा
सा तन्वी विनययुतेव साधुविद्या ।
प्रातानीन्मुदमभितस्स्वभर्तृयुक्ता
लोकानां सुजनगतेव राज्यलक्ष्मीः ॥ २१ ॥
कार्यज्ञाविति पितरौ वधूमणेस्तौ
प्रावक्तां निजदुहितुः पतिं विनम्रौ ।
बालेयं प्रियतनयावयोस्सुशीला
दत्ता सम्प्रति सहबाष्पधारया ते ॥ २२ ॥
एषा त्वत्पदकमले सदोपकर्तुं
सन्नद्धा मृदुगमना ममैकपुत्री ।
आयत्ता त्वयि ललना मनोवचोङ्गै-
स्स्यात्यक्त्वा निजपितराविहाश्रुपूर्णौ ॥ २३ ॥
त्वत्पत्नी भवति पतिंवरा सुशीला
सम्पोष्टुं सह भवता कृताभिषेका ।
कर्मक्ष्मां प्रियतनयावयोरियं त्वं
सर्वज्ञः प्रकथनयोग्यमस्ति किं ते ॥ २४ ॥
सोत्कण्ठौ रुचिरमलङ्कृतौ सखीभि-
र्नीयेतेस्म तरुणजम्पती क्षणेन ।
अन्योन्याधिकरमणीयतान्वितौ तौ
ह्रीमन्तौ स्मितललितौ विहारसौधम् ॥ २५ ॥

सन्ध्यायामुदवसितानि राज्ञिदेशा
दास्थानोपगतजना ययुः प्रहृष्य ।
भूदेवं स तमवनम्य चक्रवर्ती
स्वागारं मुदितमना ययौ कृतार्थः ॥ २६ ॥

सुस्वासम्मदपरिपूरितस्त्रियामां
कृत्वा सोऽचिरमखिलप्रभातकृत्यम् ।
अध्यास्ते स्म सदसि दिव्यभद्रपीठं
ग्रावाग्रं हरिरिव साधु सार्वभौमः ॥ २७ ॥

गव्यूतिद्वयपरिमेयनिष्कुटान्ते
सैकान्नत्रिदशसहस्रपीठरम्या ।
आस्थान्यास्त उपविवेश तत्र नाना
देशीयाधिपविसरः प्रमोदयुक्तः ॥ २८ ॥

पार्षद्या द्विजयुगलं विलोककाश्श्री
युक्तां भूपतितनयां निरीक्षकास्ते ।
कार्यज्ञा स्फुरदुचितासनोपविष्टा
अन्योन्यं सदसि तदा ब्रुवन्प्रतीपम् ॥ २९ ॥

पाषाणः प्लवतइतः पयस्सु चित्रं
तूलः सम्प्रति सहसा निमज्जतीह ।
चन्द्रेशस्तरुणसुतेन वृद्धवप्ने
वत्रातश्चतुरजनेन पुण्यभूमेः ॥ ३० ॥

नूनं तावतुलितदिव्यशक्तिमन्तौ
पाश्चात्यप्रकटितशत्रुधूमकेतू ।
क्ष्माचक्रं चिरमपि शासितुं समर्थौ
मित्रं यो भवति तयोस्स एव धन्यः ॥ ३१ ॥

इत्थम्प्राज्वलदनिवार्यकोपवह्नि
मौनीनां बहुमहनीयकर्मभूमेः ।

सर्वत्राहितबलकाननं दिधक्ष
त्येवाद्यात उचित एतयोस्सुपन्धिः ॥ ३२ ॥
पीत्वा खल्वनवसरद्विजाग्निहालां
दत्वालम्प्रियतनयामणिं विराजे ।
पाश्चात्यप्रकटितमन्युहेतुभूतः
किं धीमान्स्वकुलकलङ्क एष भूपः ॥ ३३ ॥
पित्र्यं सच्छ्रुतमपि हन्ति पादघातं
स्वीकृत्य द्विजकुलबन्धुतां स एषः ।
पाश्चात्यावनिवलये समन्ततोऽद्य
प्राचीन श्रुतिशिरसां मतं व्यशिक्षत् ॥ ३४ ॥
स्वाचारं जनपतिनावलम्बयेते
तं पुण्यावनिगुरुतामदीदृशेताम् ।
पश्यैनौ द्विजकुलशेखरावुदेति
प्राग्देशे व्यसनमुपैति पश्चिमेऽर्कः ॥ ३५ ॥
भूदेवोत्तमरचितोरुयन्त्रपक्षी
शक्तो द्वादशशतयोजनानि गन्तुम् ।
तत्राप्याचितभरधारणे समर्थो
नाकेऽहर्दिवमथ सज्जितो बभूव ॥ ३६ ॥
आस्थान्यामिति स उवाच भूमिदेव
स्सर्वेमां शृणुत सभासदो महान्तः ।
वात्सल्यादिह गुरुणेव साधुशिष्य
स्स्निग्धो मेऽक्रियत महीभृतात्मतुल्यः ॥ ३७ ॥
तां जीवान्तकशकबाणपातितां द्वि
टसंरुद्धाम्बहुरुदतीं सनिर्गताशाम् ।
रक्षित्वेदृशमनुकम्पया मुमोच
स्वेच्छायै श्रुतिमतपुण्यभूमिहंसीम् ॥ ३८ ॥

अन्योन्यान्तरकलहैर्निजात्मजानां
तां वेदप्रियभयकृच्छकेशशिष्टया ।
सत्रस्तां सुखयति भाग्यदेववत्स
क्ष्मानाथो बुधनुतकर्मभूमिसाध्वीम् ॥ ३९ ॥
बान्धव्यं रिपुकुलपीडनाय चन्द्र
द्वीपस्याद्य भवति दिव्यपुण्यभूमेः ।
प्राचीनश्रुतिमतसाधुकर्मसिद्ध्यै
सर्वत्र द्विजकुलसम्मदोपलब्ध्यै ॥ ४० ॥
जामातुः प्रियतमकर्मभूमिलक्ष्मीं
प्रापय्य त्वमनुज शीघ्रमेहि धीमन् ।
शासित्वेत्युरुहरणं निजात्मजायै
दत्वैट्टद्विजयुगलं स सार्वभौमः ॥ ४१ ॥
आकाशाध्वनि युवराजमुद्धरन्स
क्ष्मादेवं तरुणवधूवरौ पतत्री ।
संडीय द्रुतमपि योजनार्धमूर्ध्वं
सायं प्राग्दिशमसृपन्मनोजवेन ॥ ४२ ॥
आकीटं कृशमपि भौमवस्तुजालं
दृग्यत्रैस्सपदि विलोक्य तैर्दविष्ठम् ।
संस्पृष्टैर्निरुपमसौख्यदानिलेने
व स्वप्नेऽद्भुतगतिरन्तरान्वभावि ॥ ४३ ॥
सम्भूयान्नृपतनयस्य तारकस्ये
त्यायुष्यं महितसुखं सतोरणेषु ।
लेखित्वा विबुधपुरीजनो महेना
भ्युत्थानप्रमुदितमानसो बभूव ॥ ४४ ॥
स्वाधीनेऽत्र सकलचक्रवर्तिसैन्ये
सङ्कीर्णेऽखिलभुवने निजप्रतापे ।

आयातीति नृपसुतस्सबन्धुमित्र
स्तेऽनन्दन्विबुधपुरीजना वदन्तः ॥ ४५ ॥
स्वच्छन्दं श्रुतिगदितं यथेष्टकर्मा
म्नोम्यात्माभिलषितजीवनं पुनस्स्यात् ।
षट्कर्मेति विबुधपत्तनेऽवगल्भां
चक्रे पावनमुपचित्य गार्हपत्यम् ॥ ४६ ॥
पुण्येनाखिलभरतावनीजनानां
राजन्यप्रियतनयस्सदारमित्रः ।
सौधेऽवातरदचिरेण नाकयाना
त्प्रत्यूषे निजपितृचुम्बितो यशस्वी ॥ ४७ ॥
तिष्ठद्भुक्षितिपसुतं स चक्रवर्ति
भ्राता प्राज्यभरतवर्षपालनाय ।
भूदेवैर्जननुतमभ्यषीषिचत्तं
द्राक्सिंहासनमधिरोपयन्कृतज्ञः ॥ ४८ ॥
गोविप्रानवनिगमोक्तधर्मरीत्या
साम्राज्यं चिरमिह पालयेत्युदित्वा ।
भूषित्वाश्चितमकुटेनमित्रशीर्षं
कर्तेत्थं स्म भवति तारको नृपाणाम् ॥ ४९ ॥
राजन्यो जननुतसार्वभौमपुत्री
जानिः प्राज्यभरतवर्षचक्रवर्ती ।
आस्थानोपगतसमस्तभारतीय
क्षोणीशान्प्रियवचनान्यवोचदित्थम् ॥ ५० ॥
भो भोस्सुप्रजस इलेश्वरा महान्त
श्शृण्वन्तु प्रथितसभासदो भवन्तः ।
मामित्थं विरचितवान्स चक्रवर्ती
स्वच्छन्दाधिपमिह सर्वकर्मभूमेः ॥ ५१ ॥


कारुण्यादिह सुदिवा वयं स्वतन्त्राः
श्रीमन्तो बुधनुतचक्रवर्तिनःस्मः ।
कुर्वाणास्सततपरस्परानुकूलं
सुख्यामागमनियतात्मराजकृत्यम् ॥ ५२ ॥
शुभ्रांशुं रविरिव मामदीदिपद्यो
नामाद्याप्रथयत सार्वलौकिकंमे ।
सर्वज्ञो द्विजमणिरुष्णरश्मितेजा
श्श्रीमान्सैष भरतवर्षभाग्यदेवः ॥ ५३ ॥
मन्मित्रं मम शरणंमदिष्टदैवं
भूदेवं सकलजगद्गुरुं स्वतन्त्रम् ।
नित्यं संश्रितजनतारकं प्रणम्य
स्वच्छन्दं पृथुभरतावनिं भुनज्मि ॥ ५४ ॥
सन्मालामभिनवसार्वभौम इत्थं
संस्तुत्यात्मसखमतीव सृज्यमानः ।
कण्ठं न्यक्षिपदभितोऽग्रजातिमौलेः
स्थाने भूपतिषु कृतज्ञता महत्वम् ॥ ५५ ॥
द्वेष्टा त्वामिह यदि कोऽपि मन्दभाग्य
स्साहाय्यं मम सपदि त्वमर्थयस्व ।
भाषित्वेति स दुहितुः पतिं जगाम
भ्रातात्मालयमथ चक्रवर्तिमौलेः ॥ ५६ ॥
उद्यानं तत इव चैत्रिकस्स्वगेहं
प्राप्य द्रागभिजनबन्धुवार्धिचन्द्रः ।
स्वीकृत्योचितललनां गृहस्थरायं
सन्तानं बहुतनुते स्म तारकोऽसौ ॥ ५७ ॥
प्राव्राजीद्रुदति न कोऽपि पुण्यभूमौ
सर्वत्राखिलमनुजोऽभवत्स्वतन्त्रः ।

पद्धत्यास्य नहि बभूव दुष्टबाधा
द्याशास्ते जनमिदमित्थमेव काव्यम् ॥ ५८ ॥

शार्दूलविक्रीडितं ।

भव्यं नागरविक्रमं गजहयं ज्ञानब्रुवाणश्रुतिं
भक्तिं राजितजन्यरङ्गजयनं भोगक्रियोदारताम् ।
जग्धिं यज्ञियपत्रकृद्द्विजवराचारं प्रभासः क्षमां
माम्बन्धो भवनं भवान्व्रजतु सूतिं बोधतां भद्र माम् ॥५९

चक्रबन्धः



(तृतीय चक्रे) नारायणदासः
(षष्ठ चक्रे) विजयनगरम्
इत्युद्दिष्टनामनी

शुद्धिपत्रम्.

प्रथमसर्गे

२९	श्लोके	(तरा) रता
३९	,,	(दृज्ञा) ज्ज्ञा
४२	,,	(दि) दु
५७	,,	(ग्रस) च्छम

द्वितीयसर्गे

१९	,,	(ऽवा) ऽव
२६	,,	(सनहि) हितम

तृतीयसर्गे

३	,,	(कैः) कः
८	,,	(ष्टा) ष्ठा
३२	,,	(न न्तो) ना ना

चतुर्थसर्गे

३१	,,	(ण्य) ष्य

6 H9
T134

ಕಂಟ್ರಾಕ್ಟ್ ಸಂಖ್ಯೆ... P2860